# सिंहशशक-कथा

(विषयोऽयं पञ्चतन्त्रम् इति आख्यायिकाग्रन्थात् आनीतः । एषा आख्यायिका पण्डितविष्णुशर्मणा सुखेन बालानां नीतिशिक्षार्थं विरचिता । पशुपक्षिणां चरित्रमाधारीकृत्य नीत्युपदेशपूर्णाः कथाः अत्र उपलभ्यन्ते । प्रकृतपक्षे पञ्चतन्त्रमेव बालानां सर्वोत्तमः शिक्षणीयः ग्रन्थः । प्रदत्तसिंहशशककथायां बुद्धिबलेन कथम् अत्याचारिणः विनाशः सम्भवेत् तदेव प्रतिपादितम् । मूलकथायाः संक्षेपणम् अत्र विहितम् ।)

कस्मिंश्चिद् वने भासुरको नाम सिंहः प्रतिवसति स्म । अथासौ नित्यमेवानेकमृगशशकादीन् व्यापादयति । अथान्येद्युः तद्वनजाः सर्वे वराहादयो मिलित्वा तमभ्युपेत्य प्रोचुः, ''स्वामिन् ! किमनेन सकलमृगवधेन नित्यमेव, यतस्तव एकेनाऽपि मृगेण तृप्तिर्भवति । अद्य प्रभृति तवात्रोपविष्टस्य जातिक्रमेण प्रतिदिनमेको मृगो भक्षणार्थं समेष्यति । एवं कृते तव तावत् प्राणयात्रा क्लेशं विना भविष्यति, अस्माकं च पुनः सर्वोच्छेदनं न स्यात् ।''

अथ तेषां वचनमाकर्ण्य भासुरक आह, ''अहो ! सत्यमभिहितं भवद्भिः । परं यदि नित्यमेव नैकः श्वापदः समागमिष्यति, तन्नूनं सर्वानपि भक्षयिष्यामि ।'' अथ ते तथैव प्रतिज्ञाय तत्रैव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं क्रमेण याति ।

अथ कदाचित् जातिक्रमात् शशकस्य वारः समायातः । स समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा सिंहस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावत् गच्छति, तावन् मार्गे कूपमेकं दृष्टवान् । यावत् स कूपोपरि याति, तावत् कूपमध्ये आत्मनः प्रतिबिम्बं ददर्श । दृष्ट्वा च, तेन चिन्तितम्, ''यत् भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्ध्यास्मिन् कूपे पातयिष्यामि ।''

अथासौ दिनशेषे भासुरकसमीपं प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः व्यचिन्तयत्- ''अहो, प्रातराहाराय निःसत्त्वं वनं मया कर्त्तव्यम् ।'' एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य तस्याग्रे स्थितः । अथ तं प्रज्वलितात्मा भासुरको भर्त्सयमान आह, ''रे शशकाधम ! एकस्तावत् त्वं लघुः, अपरतो वेलातिक्रमेण प्राप्तः । तस्मादपराधात् त्वां निपात्य प्रातः सकलान्यपि मृगकुलानि उच्छेदयिष्यामि ।''

एतच्छ्रुत्वा शशकः सविनयं प्रोवाच- ''स्वामिन् ! नापराधो मम न च सत्त्वानाम् । तच्छ्रूयतां कारणम् ।'' सिंह आह, ''सत्वरं निवेदय यावन् मम दंष्ट्रान्तर्गतो न भविष्यसि ।'' शशक आह, ''स्वामिन् ! समस्तमृगैरद्य जातिक्रमेण मम लघुतरस्य प्रस्तावं विज्ञाय चतुर्भिः शशकैः सहाहं प्रेषितः । ततोऽहमागच्छन् मार्गे महता केनचिदपरेण सिंहेन गह्वरात् निर्गत्याभिहितः, 'रे क्व प्रस्थिता यूयम् ? अभीष्टदेवतां स्मरत ।''

ततो मयाभिहितम्, ''वयं स्वामिनो भासुरकसिंहस्य सकाशमाहारार्थं गच्छामः ।'' ततस्तेनाभिहितम्, ''यद्येवं तर्हि मदीयमेतद् वनम् । मया सह समस्तैरपि श्वापदैर्वर्तितव्यम् । चौररूपी स भासुरकः । अथ यदि सोऽत्र राजा ततो विश्वासस्थाने चतुरः शशकानत्र संस्थाप्य तमाहूय द्रुमागच्छ । यः कश्चिद् आवयोर्मध्यात् पराक्रमेण राजा भविष्यति ।'' ततोऽहं तेनादिष्टः स्वामिसकाशमभ्यागतः । एतद् वेलातिक्रमकारणम् । तदत्र स्वामी प्रमाणम् ।''

तच्छ्रुत्वा भासुरक आह, ''भद्र ! यद्येवं तत् सत्वरं दर्शय मे तं चौरसिंहं येनाहं मृगकोपं तस्योपरि क्षिप्त्वा स्वस्थो भवामि ।'' शशक आह, ''स्वामिन् ! परं भवतः शत्रुः दुर्गाश्रयः । ततो दुर्गस्थो दुःसाध्यो भवति रिपुः ।'' भासुरक आह, ''भद्र ! दुर्गस्थमपि दर्शय तं चौरसिंहं येन व्यापादयिष्यामि ।''

अथ शशक आह, ''यद्येवं तदागच्छतु स्वामी ।'' एवमुक्त्वाग्रे चलितः । ततश्च पूर्वदृष्टकूपमासाद्य स भासुरकमाह, ''स्वामिन् ! कस्ते प्रतापं सोढुं समर्थः ? त्वां दृष्ट्वा दूरतोऽपि स चौरसिंहः प्रविष्टः स्वं दुर्गम् । तदागच्छतु, येन दर्शयामि ।''

भासुरक आह, ''अरे दर्शय मे तद् दुर्गम् ।'' तदनु शशकेन दर्शितः कूपः । ततः सोऽपि मूर्खः सिंहः कूपमध्ये आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनादमकरोत् । ततः प्रतिशब्देन कूपमध्यात् द्विगुणतरो नादः समुत्थितः । अथ तेन तं शत्रुं मत्वात्मानं तस्योपरि प्रक्षिप्य प्राणाः परित्यक्ताः । शशकोऽपि हृष्टमनाः सर्वमृगानानन्द्य तैः सह यथासुखं तत्र वने न्यवसत् ।

## टिप्पणी

अन्येद्युः - ଅନ୍ୟ ଏକ ଦିନେ (अन्यस्मिन् दिवसे) । सर्वोच्छेदनम् - ସମସ୍ତଙ୍କ ବିନାଶ (सर्वेषां विनाशः) । आकर्ण्य - ଶୁଣି (श्रुत्वा) । श्वापदः - ହିଂସ୍ରଜନ୍ତୁ (शुनः पदानि इव पदानि यस्य) । पर्यटन्ति - ପର୍ଯ୍ୟଟନ କରନ୍ତି (पर्यटनं कुर्वन्ति) । क्षुत्क्षामकण्ठः - କ୍ଷୁଧାତୁରକଣ୍ଠ (क्षुधा क्षामः कण्ठः यस्य) । प्रज्वलितात्मा - ଅତି କ୍ରୋଧଯୁକ୍ତ (नितरां कोधपरवशः) । निपात्य- ହତ୍ୟାକରି (हत्वा) । सत्त्वानाम् - ପ୍ରାଣୀମାନଙ୍କର (प्राणिनाम्) । संस्थाप्य - ରକ୍ଷି (संस्थापनं कृत्वा) । एवमुक्त्वा - ଏହିପରି କହି (एवं कथयित्वा) । भर्त्सयमानः - ଗାଳିଦେଇ (भर्त्सनां कुर्वन्) । दुर्गाश्रयः - ଦୁର୍ଗରେ ରହିଥିବା (दुर्गम् आश्रयः यस्य) । प्रतिशब्देन - ପ୍ରତିଧ୍ୱନି ଦ୍ୱାରା (प्रतिध्वनिना) । प्राणयात्रा - ଜୀବନଯାତ୍ରା (जीवननिर्वाहः) ।

## अभ्यासः

1. **निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

   (क) भासुरकः कथं मृतः ?

   (ख) क्रुद्धः सिंहः शशकं किमवदत् ?

   (ग) वन्यजन्तवः भासुरकाय कीदृशं प्रस्तावं दत्तवन्तः ?

   (घ) शशकः विलम्बस्य कारणं किमवदत् ?

   (ङ) पशूनां प्रस्तावं श्रुत्वा भासुरकः किमाह ?

2. **निजभाषया एकपदात्मकं/अतिसंक्षिप्तमुत्तरं लिखत ।**

   (क) भासुरकः नित्यं कान् व्यापादयति ?

   (ख) जातिक्रमेण कदाचित् कस्य वारः आगतः ?

   (ग) शशकः कूपमध्ये किमपश्यत् ?

   (घ) कीदृशः रिपुः दुःसाध्यः ?

   (ङ) प्रतिशब्देन कूपात् कः समुत्थितः ?

   (च) भासुरकः कथं स्वस्थो भविष्यति ?

   (छ) मार्गे गच्छन्तं शशकं अपरः सिंहः दृष्ट्वा किमुवाच ?

   (ज) शशकः समस्तमृगैः प्रेरितः किमकरोत् ?

   (झ) कूपे स्वप्रतिविम्बं दृष्ट्वा शशकः किमचिन्तयत् ?

   (ट) प्रतिदिनं कति श्वापदाः भासुरकसमीपं यान्ति ?

3. **सन्धिविच्छेदं कुरुत ।**

   यतस्तव, कस्ते, तदनु, शशकानत्र, प्रातराहाराय, यद्येवम्, तदागच्छतु, साध्यो भवति, दुर्गस्थमपि सिंहनादमकरोत् ।

4. **सन्धिं कुरुत ।**

तृप्तिः + भवति, न + एकः, तस्य + अग्रे, सकलानि + अपि, सः + अहम्, सर्वाम् + एकाम्, तस्य + उपरि, मत्वा + आत्मानम्, सर्व + उच्छेदनम्, कः + चित् ।

5. **रेखाङ्कितपदानां विभक्तिनाम लिखत ।**

(क) ते वने निर्भयाः पर्यटन्ति ।

(ख) त्वं वेलातिक्रमेण प्राप्तः ।

(ग) समस्तैः श्वापदैः वर्त्तितव्यम् ।

(घ) दुःसाध्यो भवति रिपुः ।

(ङ) कूपमध्यात् द्विगुणतरो नादः समुत्थितः ।

6. **रेखाङ्कितपदानां विभक्तिकारणं लिखत ।**

(क) स्वामिन् ! भवतः शत्रुः दुर्गाश्रयः ।

(ख) अथ शशकः आह ।

(ग) निःसत्त्वं वनं मया कर्त्तव्यम् ।

(घ) मया सह वर्त्तितव्यम् ।

(ङ) अभीष्टदेवतां स्मरत ।

7. **वाक्यानि रचयत ।**

उपरि, विना, क्रमेण, सविनयम्, सह, यथासुखम्, एवम्, स्मरत, तत्र, कर्त्तव्यम् ।

8. **शुद्धम् उत्तरं निरूपयत ।**

(क) सिंहस्य नाम किमासीत् ?

(i) भस्मासुरः (ii) क्षुद्रबुद्धिः

(iii) भासुरकः (iv) चण्डरवः

(ख) रिपु: कदा दु:साध्यो भवति ?

(i) गृहस्थ: (ii) दुर्गस्थ:

(iii) ग्रामस्थ: (iv) गर्भस्थ:

(ग) मूर्ख: सिंह: कूपमध्ये आत्मन: प्रतिबिम्बं जलमध्यगतं दृष्ट्वा किमकरोत् ?

(i) शङ्खनादम् (ii) ब्रह्मनादम्

(iii) सिंहनादम् (iv) धरानादम्

(घ) कदाचित् जातिक्रमात् कस्य वार: समायात: ?

(i) मृगस्य (ii) गजस्य

(iii) शशकस्य (iv) अश्वस्य

(ङ) केन पञ्चतन्त्रं विरचितम् ?

(i) विष्णुशर्मणा (ii) कालिदासेन

(iii) नारायणेन (iv) नारदेन

**9. शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) प्राणयात्रा ____________ विना भविष्यति ।

(ख) कूपमध्ये ____________ प्रतिविम्बं ददर्श ।

(ग) शशक: ____________ प्रोवाच ।

(घ) मृगकोपं ____________ उपरि क्षिप्त्वा स्वस्थो भवामि ।

(ङ) स चौरसिंह: प्रविष्ट: स्वं ____________ ।

| सविनयं, दुर्गम्, क्लेशं, तस्य, आत्मन: |
|---|

●●●